ऽ इति षत्र्ञ् । ऋगादिवेदत्रयविहितहौत्राध्वर्य्यवौद्गात्रार्हे ज्योतिष्टोमादौ काम्यकर्म्मणि ।

**त्रैधातवी** स्त्री उदवसानीयाख्ये इष्टिभेदे "तस्य योनि-राशय आस । तमनु पराहत्य संलुप्याच्छिनत् सेषेष्टिर-भवत् तद्यदेतस्मिन्नाशये त्रिधातुरिवैषाविद्याशेत तस्मा-त्त्रैधातवी नाम" शत० ब्रा० ५।५।५।६। "सर्वा इष्टी-रपि दर्विहोमान्यो राजसूयेन यजते देवसृष्टो वा एषे-ष्टिर्यत्त्रैधातवी" ११। "त्रैधातव्युदवसानीयासावेव बन्धुः" शत० ब्रा० १३।६।२।७। "त्रैधातव्युदवसा-नीया सर्वत्र" कात्या० श्रौ० १३।४।८।

**त्रैधातवीय** न० त्रिधातवी+गहा० छ। इष्टिभेदाङ्गकर्मभेदे "सर्वो वा एष यज्ञो यत्त्रैधातवीयम्"तैत्ति०स०२।४।११।२।

**त्रैधातुक** त्रि० त्रिभिः धातुभिः स्वर्णरौप्यताम्रैः निर्वृत्तः ठञ्। स्वर्णादिधातुत्रयनिष्पाद्ये।

**त्रैनिष्किक** त्रि० त्रिभिः निष्कैः क्रीतम् ठक्। त्रिनिष्क-क्रीते। तस्य वा लुक्। त्रिनिष्क अप्यत्र।

**त्रैपारायणिक** त्रि० त्रिः पारायणमावर्तयति ठञ्। त्रि-वारं वेदपारायणकारके।

**त्रैपुर** पु० त्रिपुर+स्वार्थे अण्। १त्रिपुरदेशे हेमच०। त्रि-पुरोऽभिजनोऽस्य तस्य राजा वा अण्। २पित्रादिक्रमेण तद्वासिनि ३त्रिपुराधीशे च बहुषु अणो लुक्।"मेल-कैस्त्रैपुरैश्चैव चिच्छलैश्च समन्वितः" भा० भी० ८८ अ०। आर्षत्वात् बहुषु अणो न लुक्। त्रिपुरं पुरत्रयमस्त्यस्य अण्। त्रिपुरस्वामिषु ४असुरभेदेषु त्रिपुरशब्दे दृश्यम्। "येनोद्धृतास्त्रैपुरा मायिनो वै दग्धाघोरेण वितथान्ताः शरेण" हरिवं० १३१ अ०।

**त्रैपुरुष** त्रि० त्रीन् पुरुषान् व्याप्नोति अण् आर्षे पूर्वपद-वृद्धिः। त्रिपुरुषव्यापके। "ब्राह्मणानिन्दिता राजन्! हन्युस्त्रैपुरुषं कुलम्" भा० आनु० ९० अ०। लोके तु उत्तरपदवृद्धिः त्रिपौरुष इत्येव।

**त्रैफल** न० त्रिफलानां तदाद्यद्रव्याणामिदम् अण्। चक्रदत्तोक्ते घृतभेदे। यथा "त्रिफलां त्र्यूषणं द्राक्षां मधुकं कटुरोहिणीम्। प्रपौण्डरीकं सूक्ष्मैलां विडङ्गं नागकेसरम्। नीलोत्पलं शारिवे द्वे चन्दनं रजनीद्वयम्। कार्षिकं पयसा तुल्यं त्रिगुणं त्रिफला-रसम्। घृतप्रस्थं पचेदेतत् सर्वनेत्ररुजापहम्। ति-मिरं दोषमास्रावं कामलां काचमर्बुदम्। वीसर्पं प्रदरं कण्डूं रक्तं श्वयथुमेव च। खालित्यं पलित-ञ्चैव केशानां पतनन्तथा। विषमज्वरमर्माणि शुक्र-ञ्चाशु व्यपोहति। अन्ये च बहवो रोगा नेत्रजा ये च वर्त्मजाः। तान् सर्वान् नाशयत्याशु भास्करस्तिमिरं यथा। न चैवास्मात् परं किञ्चिद्दृष्टिभिः काश्यपादिभिः। दृष्टिप्रसादनं दृष्टं यथा स्यात् त्रैफलं घृतम्"।

**त्रैबलि** पु० ऋषिभेदे "दामोष्णीषस्त्रैबलिश्च पर्णादो घट-जानुकः। मौञ्जायनो वायुभक्षः पाराशर्य्यश्च सारिकः" भा० स० ४ अ०।

**त्रैमातुर** पु० तिसृणां मातॄणामपत्यम् अण् मातुरुत्। तिसृणां कौशल्याकैकेयीसुमित्राणां स्नेहभाजनत्वेन तदीयांशपायसभोजनेन जनिते लक्ष्मणे "त्रैमातुरः कृत्स्नजिताङ्गशत्रुः" भट्टिः। "सद्भिः सुमित्रया, स्वांशपिण्डद्वयप्रदानात्ताभ्याञ्च जनितः" जयम०। तत्कथा रामायणे दर्शिता यथा "पायसं प्रति-गृह्णीष्व पुत्रीयं त्विदमात्मनः। कौशल्यायै नरपतिः पायसार्द्धं ददौ तदा। अर्द्धादर्द्धं ददौ चापि सुमि-त्रायै नराधिपः। कैकेय्यै चावशिष्टार्द्धन्ददौ पुत्रार्थ-कारणात्। प्रददौ चावशिष्टार्द्धं पायसस्यामृतोपमम्। अनुचिन्त्य सुमित्रायै पुनरेव महामतिः। एवन्तासां ददौ राजा भार्य्याणां पायसं पृथक्। तास्त्वेव पायसं प्राप्य नरेन्द्रस्योत्तमाः स्त्रियः। सम्मानं मेनिरे सर्वाः प्रहर्षोदितचेतसः। ततस्तु ताः प्राश्य तमुत्तमस्त्रियो महीपतेरुत्तमपायसं पृथक्। हुताशनादित्यसमानतेज-सोऽचिरेण गर्भान् प्रतिपेदिरे तदा" आ० १६ स०।

**त्रैमासिक** त्रि० त्रिमासं तृतीयमासं भूतः स्वसत्तया प्राप्तः "तमधीष्टो भृतो भावी"पा० ठञ् वृत्तौ त्रिशब्दस्य पूरणा-र्थत्वेन संख्यावाचकत्वाभावात् न द्विगुत्वं तेन "द्विगो-र्लुगनपत्ये" पा० न लुक्। स्वसत्तया जन्मतस्तृतीय-मासव्यापके त्रिमासवयस्के "तोकेन जीवहरणं यदु-लूकिकायास्त्रैमासिकस्य च पदा शकटोऽपवृत्तः" भाग० २।७।२८। २त्रिमासभवे च।

**त्रैमास्य** न० त्रिमास+स्वार्थे ष्यञ्। त्रिमासे "अर्द्धमास-मासत्रैमास्यषाण्मास्ये चैके" का० श्रौ० २०।३।६।

**त्रैयम्बक** त्रि० त्रियम्बको देवता अस्य। "त्र्यम्बकदेवताके १पशुभेदे। "पृषन्तस्त्रैयम्बकाः" यजु० २४।१८। "त्रिंशे यूपे त्रियम्बकदेवताकाः पृषन्तः" वेददी०। २होमभेदे पु० "त्रैयम्बकान् यक्ष्यामि" इत्युपक्रमे कात्या० श्रौ० ५। १०।१। "निर्वपति रौद्रानित्यादिना ते होमाः दर्शिताः